RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2018-20
Approved Journal by UGC - No 40484

॥ ओ३म् ॥

अर्थनाशं मनस्तापं गृहे
दुश्चारितानि च।
वञ्चनं चाऽपमानं च
मतिमान्न प्रकाशयेत्॥

( चाणक्य-नीति )

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

॥ ओ३म् ॥

धन-धान्यप्रयोगेषु
विद्यासंग्रहणेषु च।
आहारे व्यवहारे च
त्यक्तलज्जः सुखी भवेत्॥

( चाणक्य-नीति )

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

卐 वर्षम्-८ 卐 अंकः-१५ ( १८३ ) 卐 १ फरवरीः २०१९ तः १५ फरवरीमासः २०१९ पर्यन्तम् 卐 विक्रमसंवत्-२०७५ 卐 सृष्टिसंवत्-१,९६,०८,५३,११९ 卐 पृष्ठम्-८

## सप्ततितमगणतंत्रदिवसे पराक्रमस्य संस्कृतेः च अद्भुतं प्रदर्शनम्

नवदेहली। गणतंत्र दिवसे गतवर्ष वत् राजपथे पराक्रममेव संस्कृतेः अद्भूत् दृश्यं अभवत् गणतंत्रदिवसे परेड दर्शनार्थमागतं देशस्य सर्वस्य क्षेत्रस्यः समुदाय जाति एवं धर्मस्य जना अनेकतायामेकतायाः अद्भुत प्रदर्शनं कृतवन्तः। राजपथे सत्येन सह प्रदेशस्य



संस्कृतेः दृश्यम एवं तस्य प्रदर्शनेन बालकः महिला, युवा एवं वृद्धस्य मुखे उत्साह आसीत्। राजपथे रामनाथकोविन्दस्य समक्षे तिरंग धृत्वा एकविंशति आयुधानां सलामी अभवत्। अस्मिन्नवसरे देशस्य सुरक्षार्थं शहीद शैनिकान् स्मरणं कृतवन्तः। जम्मुकश्मीरस्य। चतुरत्रिंशत् लाइट इन्फैक्ट्री वाटिलियनस्य लांसनायक लाजीरअहमदवानीं मरणोपरान्त अशोकचक्रं दत्तवान।

अस्मिन्नवसरे विदेशतः दक्षिण अफ्रिकायाः राष्ट्रपति सिरिलरामफिसा समेत राजनाथसिंह, शुषमास्वराज, मनमोहनसिंह, एचडीदेवगौडा, राहुलगाँधी व गुलामनवीआजाद आसन्।

## मोदिसर्वकारस्य मार्गदर्शने देशः प्रगतिपथे अस्ति-महामहिमोराष्ट्रपतिः

नवदेहली। लोकसभा संसदस्य अन्तरिम संयुक्तसत्रे राष्ट्रपति रामनाथकोविंदः उक्तवान यत् मोदी सर्वकारस्य मार्गदर्शने देशः विकास एवं परिवर्तनस्य पथे अस्ति। देशे सकारात्मक परिवर्तनस्य इयं प्रक्रिया प्रचलिष्यति यद्यपि मोदी सर्वकारः न्यु इन्डिया निर्माणे कार्यं करोति । राष्ट्रपति पञ्चवर्षस्य उपलब्ध्यां उक्तवान यत् सर्वकार देशं अनिश्चिततायाः पथतः निश्चित पथे आनीतम्।



संसदस्य केन्द्रियकक्षे संयुक्तत्वावधाने राष्ट्रपति मोदीसर्वकारस्य उपलब्धि विषये उक्तवान। पुरातन सर्वकारस्य आलोचना कृत्वा उक्तवान यत् यदा 2014 तमे वर्षे मोदी सर्वकारः आगतं तदा देशेसर्वत्र अनिश्चितता एवं भ्रष्टाचार आसीत् परञ्च वर्तमान सर्वकार पारदर्शितायाः उदाहरणं दत्वा सर्वोन्मुखी विकासः कृतवान। ते उक्तवन्तः यत् उज्वला योजना माध्यमेन महिला कृते षड्कोटी गौसकनेक्सन दत्तवान। एवं सौभाग्य योजनामाध्यमेन 2.47 कोटी गृहे विद्युत कनेक्सन दत्तवान। ग्रामीणआवासयोजनायाः तहत। 1.30 कोटी गृहस्य निर्माणमभवत्। 10 प्रतिशतं आरक्षणं निध 'न सामान्यजनानां कृते दत्वा सर्वकारः नूतन उदाहरणं प्रदर्शितवान। शौचालयस्य निर्माणं कृत्वा महिलायाः सम्मानं कृतवान। स्वच्छताअभियान माध्यमेन स्वास्थस्य संरक्षणमपि कृतवान। सर्वकारस्य आयुष्मान भारत योजना विश्वस्य बृहत्तम योजना अस्ति अनेन निर्धनानां कृते स्वास्थस्य सुविधा दत्तवान। अनया 10 लक्ष जनानां उपचारः अभवत्।

## पुण्यतिथिः



( ३०.०४.१९३२ -- ०७.०२.२०१३ )

एतत्पत्रप्रबन्धसम्पादकस्य पितुः
स्व. पं. रामकिशोरशर्मणः
पुण्यतिथौ
संस्कृतसंवाद-परिवारोऽयं
श्रद्धाञ्जलिं समर्पयति।
–संस्कृतसंवादपरिवारः।

## साहित्योत्सवे अकादमीपुरस्कारेण विजेतारः सम्मानिताः

नवदेहली। साहित्यअकादमी पक्षतः आयोजित षड् दिवसीय साहित्योत्सवस्य द्वितीयदिनोऽपि साहित्य एवं सांस्कृतिक गतिविधयः सम्यग प्रस्तुतिं दत्तवन्तः। कार्यक्रमस्यारम्भः अखिलभारतीयआदिवासी लेखिका सम्मेलनेन अभवत्। विभिन्न सत्रे आदिवासी साहित्यस्य विशिष्टता तस्य समस्या एवं समाधानं विषये कार्यक्रममभवत्। कवि सम्मेलने अनुराधामुंडु, अन्नामाधुरीतिर्कि, विश्वासीएक्क, फ्रिस्काकुजूर, इंदुमतीलवाणी, अविमायाथापामनगर व क्रौरीमोगचौधुरी सरीखी कवयित्रि स्व काव्यपांठ कृतवती। पत्रकारवार्ता समये अकादमीपुरस्कार 2018 विजेता स्व कृत्ये प्रकाशं दत्तवान। अस्मिन् सत्रं लेखिका चित्रामुद्गल (हिंदी) सनन्ततांति (असमिया), संजीवचट्टोपाध्याय (बंग्ला), शरीफाविजलीवाला (गुजराती), मुश्ताकअहमदमुश्ताक (कश्मीरी), वीणाठाकुर (मैथिलि), रमाकान्तशुक्लः (संस्कृतम्), 9 रहमानअब्बास (उर्दू) समेत 21 भाषाया उपस्थित रचनाकारः जनानां समक्षे आगतम्। सर्व सार्ध पञ्चवादने सम्मानितं कृतवान। मुख्यातिथि सहित्यअकादमीसदस्य मनोजदास व विशिष्टातिथि प्रख्यात् श्रीलंकाई लेखक एवं साहित्य अकादम्याः प्रेमचन्द्र फेलोशिपेन सम्मानितो जातः। साहित्यअकादमी अध्यक्ष चन्द्रशेखरकंवार पुरस्कार विजेतृन सम्मानिंत कृतवान। स्वीय अध्यक्षीयोद्बोधने ते उक्तवन्तः यत् अत्र ये सम्मानिताः जाताः ते सर्वे कठिनपरिश्रमेन सर्वं प्राप्तवन्तः अस्माकं संस्कृति अनेकतायां एकता अद्भूत अस्ति। अस्य सम्मानं भवितव्यम्। द्वितीयदिवसे कार्यक्रमस्यान्ते मशहूरनृत्यांगना सोनलमानसिंह एवं समूह माध्यमेन नाट्यप्रस्तुति एवं कथामंचन कृष्णा आसीत्।



दिल्ली- प्रख्यातकविभ्यो महामहोपाध्यायेभ्यः श्रीरमाकान्तशुक्लमहोदयेभ्यः 29जनवरी2019 दिनांके साहित्य-अकादमी कमानी-सभागारे 'मम जननी' काव्यप्रणयनाय सम्मानः प्रदत्तः।

# स्वामिविवेकानन्दाश्रमे ज्योतिषमेलायाः आयोजनम्

पूर्वी दिल्ली। खुरेजीखास स्थित स्वामीविवेकानंदआश्रमे द्वि दिवसीय ज्योतिष मेलायाः आयोजनमभवत्। अस्मिन् कार्यक्रमे मुख्यातिथि विधायक नितिनत्यागी विधायक एसके बग्गा व देशतः समागतः ज्योतिषि आसीत्। मेलायाः उद्घाटनं गणमान्यजनाः कृतवन्तः।

आचार्य डॉ विक्रमादित्य उक्तवान यत् अस्मिन वर्षेऽपि द्विदिवसीया पूर्वीदिल्लीमेला ज्योतिषस्य आयोजनं कृतवती। अस्योद्देश्यमस्ति सर्वं ज्योतिषं प्रति रूच्युत्पादनम्। तत्रोक्तवान यत् कः ग्रहः रोगकारकः तत्र जनाः ज्योतिषि पार्श्वे आगत्य निःशुल्क स्व समस्यायाः समाधानं प्राप्तवन्तः।

तत्र ज्योतिषस्य विविध विद्या हस्तरेखा, रमलविज्ञान, एवं विशेषज्ञेन सह परामर्शः अपि अभवत्। स्व क्षेत्रे उत्कृष्ट योगदानाथ ज्योतिषीन् पुरस्कृतवन्तः। कार्यक्रमे श्रीत्यागी उक्तवान यत् ज्योतिष विद्या भारतस्य पुरातन विद्यासु एकोऽस्ति।

भारते सर्वे अस्योपरि विश्वासः करोति परञ्च केचन अस्य व्यवसायं कृत्वा अस्य अवहेलना कृतवन्तः। श्रीवग्गा, राजीवनिसाना, ज्योतिषविद् अजयभांमी, आचार्य इन्दुप्रकाश, पं. कमलनंदाल, पं. अजयगौतम एवं अन्ये ज्योतिषि आसन्। सर्वे समस्यायाः समाधानं कृतवन्तः।

# युवा भारतीयमूलस्य ध्वजपताकायाः आरोहणं करिष्यति-राममाधवः

कुंभनगर। भारत वैदिक संस्कृतेः देशोऽस्ति। शोधः कथयति भारतीय युवकानां पार्श्वे बुद्धिमत अधिकोऽस्ति। सर्वत्र विश्वे विशिष्टपदे भारतीय अस्ति। सिलिकानवैलीतः नाशा पर्यन्तं अस्य प्रमाणोऽस्ति। एतत् सर्वं भूत्वा अपि भारतीय चिंताजनक स्थिति चिंतितः करोति। तस्य कारणमस्ति



नैतिक मूल्यस्य अभावः। अस्येव मूल्यस्य ध्वजपताका युवकाः अग्रेसरयन्तु तदानीमेव भारत धर्मप्राणदेव भविष्यति। अमयेवास्ति युवासंस्कृतिसंसदस्योद्देस्यः।

सेक्टर 14 स्थित गंगामहासभायाः शिविरे महासभायाः तत्वावधाने आयोजित युवासंस्कृतिसंसदस्योद्घाटने मुख्यातिथि भाजपाराष्ट्रियमहासचिव राममाधवः उक्तवान। यत् युवकस्य प्रतिभां देशस्य मूल्येनसह संयोजितं कर्तव्यम्। भारतस्य संस्कृति “सर्वेभवन्तुसुखिनः” अस्ति। अस्य उद्घोषः कर्तव्यम् अनेनैव मूल्यव्यवस्थायाः जीवनस्य स्थापना भविष्यति। एतत्सर्वं सर्वकारः कर्तुं न शक्यते सः संविधानस्य अनुसरणं करोति एतत् साधुजनाः एवं युवकाः कर्तुं शक्यक्ने एवं एते संस्कारेणागच्छति। ते उक्तवन्त यत् संस्कृतेः मूलाधारं शक्ति अस्ति। एवं वयं शक्ते आराधकः। एतत्सर्वं युवकाः कर्तुं शक्यन्ते। इतः पूर्वं श्रीतेन्द्रानन्दसरस्वती कार्यक्रमस्य रुपरेखा विषये उक्तवान।

ओ३म्
भारत में फैले संम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण
(द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)
सत्य के प्रचारार्थ
सत्यार्थ प्रकाश
सत्य के प्रचारार्थ

| | | |
|---|---|---|
| • प्रचार संस्करण (अजिल्द) 23×36÷16 | मुद्रित मूल्य 50 रु. प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| • विशेष संस्करण (सजिल्द) 23×36÷16 | मुद्रित मूल्य 80 रु. प्रचारार्थ 50 रु. | |
| • स्थूलाक्षर सजिल्द 20×30÷8 | मुद्रित मूल्य 150 रु. | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन
कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति **सत्यार्थ प्रकाश** के प्रचार प्रसार में सहभागी बनें
आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

# प्रणवमुखर्जी नानाजीदेशमुखः भूपेनहजारिका भारतरत्नेन सम्मानिताः



नवदेहली। गणतंत्रादिवस्य पूर्णसंध्यायां सर्वकारः प्रणवमुखर्जी, नानाजीदेशमुख एवं भूपेनहजारिकां सर्वोच्चसम्मानं “भारतरत्न” दातुं घोषण कृतवान। पूर्वराष्ट्रपति प्रणवमुखर्जीमहोदयं भारतरत्न पुरस्कारार्थं बहु जनाः राजनैतिक अर्थं निःस्सारयन्ति तेन सह जनसंघस्य प्रमुखनेता व सामाजिककार्यकर्ता नानाजीदेशमुख एवं स्व गानेन पूर्वोत्तरे प्रख्यात् चर्चित भूपेनहजारिकां इदं सम्मानं मरणोपरान्त दत्तवान। एतदर्थं प्रधानमंत्री मोदी आनन्दं व्यक्तवान। ते उक्तवन्तः प्रणव दा अस्माकं समयस्य उत्कृष्ट राजनेता अस्ति। ते देशस्य निःस्वार्थ सेवाकृतवन्तः। भूपेनहजारिकायाः संगीतं सर्व प्रेरितवन्तः एवं ते संगीतविद्या प्रेरितवन्तः। अस्मिन्नवसरे 14 प्रख्यात जनान् “पद्मभूषणं” 97 जनान् “पद्मश्री” सम्मानेन सम्मानितवान।





# फरवरीमास्य एकविंशति (21) दिनांके करिष्यामः राममन्दिरस्य निर्माणम्-स्वरूपानंदः

कुंभनगरम्। अयोध्यायां राममन्दिरस्य निर्माणाय वसन्तपञ्चम्योपरान्त साधुसन्त एवं श्रद्धालु अयोध्या गमिष्यति। सर्वे तत्र गत्वा फाल्गुनमासस्य कृष्णपक्षस्य द्वितीयातियौ फरवरीमासस्य



एकविंशति दिनांके विधिविधानेन शिलान्यासकार्यं करिष्यन्ति। एतत्सर्वं कुभे जगद्गुरू स्वरूपानन्दसरस्वती महोदयस्य मार्गदर्शने परमधर्मसंसदे अभवत्। त्रिदिवसीय सम्मलने शंकराचार्य उक्तवान यत् यत्किमपि भविष्यति परञ्च मन्दिरनिर्माणं करिष्यामः। यदि मन्दिर कार्ये सर्वकारस्य कोऽपि अंगः व्यवधानं करिष्यति तर्हि अनुचितं भविष्यति। यावत् समाधानं न भविष्यति तावत् हिन्दुसमाजः वेदोक्त इष्टिकान्यासस्य पूजनं करिष्यति। सर्वे समर्थनमपि कृतवन्तः। निर्वाणअखाडायाः महामण्डलेश्वर स्वामी प्रणवानन्दः उक्तवान यत् श्रीरामजन्मभूमी हिन्दुसमाजस्य अस्ति। एवं अन्य सर्वेऽपि स्व मतं प्रस्तुतवन्तः।

# प्रख्यातसाहित्यकारकृष्णासोबती दिवंगता



हिंदी भाषायाः प्रख्यात् साहित्यकार कृष्णासोबतीः गत शुक्रवासरे दिवंगताः जाताः। सा 93 वर्षीयासीत्। तां ज्ञानपीठ व साहित्यअकादमी सदृश पुराकारः आसीत्। सा सप्त लघुउपन्यास च चतस्र लघुकथायाः रचना कृतवती ताः बहुसमयात् अस्वस्थः आसन्। ताषामन्त्येष्ठि निगमबोधघाटे अभवत्। तां भ्राता जगदीशसोबती मुखाग्नि दत्तवान।

सा स्वतंत्र लेखनं कृत्वा कहानी व उपन्यास विद्यां समृद्धवती। साहित्यअकादमी 1996 तमे वर्षे महत्तरसदस्य रूपेण तां सम्मानितं कृतवान। तासां उपन्यास “मितरोमजानी” नूतन प्रकारक लेखनाय प्रख्यातोऽस्ति। विख्यात कृतिषु “जिन्दगीनाया, सूरजमुखी अंधेरे के” अस्ति तासां निधने अकादमी श्रद्धांजलि सभायाः आयोजनं कृतवान। अनेक साहित्यकारोऽपि दुःखं प्रदर्शितवान।

# 'संस्कृतवाङ्मये ज्ञानविज्ञानचर्चा' इति राष्ट्रिया सङ्गोष्ठी समायोजिता

छत्तीसगढस्य राजनांदगांवजनपदे शासकीयदिग्विजयमहाविद्यालयेन 'संस्कृतवाङ्मये ज्ञानविज्ञानचर्चा' इतिविषयमवलम्ब्य द्विदिवसीया राष्ट्रिया सङ्गोष्ठी जनवरीमासस्य 21-22 दिनाङ्कयोः समायोजिता। उद्घाटनसत्रे प्रसिद्धो वैज्ञानिकः ओम्प्रकाशपाण्डेयः मुख्यवक्ता, प्रो. रहसबिहारीद्विवेदी अध्यक्षः, प्रो.




सुमनसिंहबघेलः च विशिष्टातिथिः आसन्। सङ्गोष्ठ्याः प्रास्ताविकं संयोजिका डॉ. दिव्यादेशपाण्डेवर्या, स्वागतं प्राचार्यः आर.एन. सिंहः, संचालनं च डॉ. ललितप्रधान आर्यः अकुर्वन्। वैज्ञानिकः ओम्प्रकाशपाण्डेयः अवदत् यद् अस्माकं देशस्य नाम भारतं वेदमूलकमस्ति। वेदेषु विज्ञानस्य बीजं विद्यते। प्रो. रहसबिहारीद्विवेदी संस्कृते मानसिकपर्यावरणमधिकृत्य भाषणमकरोत्। शोधसत्रेषु डॉ. सत्येन्दुशर्मणः डॉ. केलकरपूर्णिमायाश्च आध्यक्ष्ये, डॉ. हेमन्तशर्मणः डॉ.राघवेन्द्रशर्मणश्च संचालने शोधपत्राणि प्रस्तुतानि। समापनसत्रे प्रो. राधावल्लभत्रिपाठी अध्यक्षः, डॉ. महेशचन्दशर्मा सारस्वतातिथिः, डॉ. नौनिहालगौतमः विशिष्टातिथिः, डॉ. अमोल देशपाण्डे च विशिष्टातिथिः आसन्। प्रो. राधावल्लभत्रिपाठी विस्तरेण संस्कृतस्य विद्यापरम्परां, डॉ. महेशचन्दशर्मा संस्कृते राजनीतिकविषयान्, डॉ. अमोलदेशपाण्डे च संस्कृते चिकित्साविज्ञानं प्रस्तुतवन्तः। डॉ. नौनिहालगौतमः 'ज्ञानविज्ञानभाण्डारं संस्कृतवाङ्मयं महत्'इति स्थापयन् प्राचीनभारतीयकरनीतेः प्रासङ्गिकतां प्रस्तुतवान्। संयोजिका संस्कृतविभागाध्यक्षा च डॉ. दिव्यादेशपाण्डे सर्वेभ्यो धन्यवादान् समर्पितवती। सरोवरतटे स्थितेऽस्मिन् रमणीयमहाविद्यालयपरिसरे हिन्दीकवेः गजाननमाधवमुक्तिबोधस्य कर्मभूमिरस्ति।

# संस्कृतकाव्यपाठाय संस्कृतस्य युवकविः डा. संजयः निमन्त्रितः

केन्द्रीयसाहित्याकादम्या ऐषमे वर्षे साहित्योत्सवाख्यः कार्यक्रमः 28 जनवरीतः 2 फरवरीं यावत् समायोजितः। तत्र जनवरीमासस्य 31 दिनाङ्के देशस्य विविधभाषाणां युवलेखकानां



सम्मेलनमासीत्। यत्र चत्वारि सत्राणि आयोजितानि। प्रथमे सत्रे डोगरी-आंग्ल -गुजराती-हिन्दी-कश्मीरी-मलयालम-मराठी-पंजाबी-उर्दू प्रभृति भाषाणां युवकवीनां काव्यपाठोऽभत्। द्वितीये सत्रे नवीनलेखकानां रचना आधारीकृत्य पत्रवाचनं जातम्। तृतीये सत्रे कथापाठः आयोजितः। चतुर्थे पुनः युवकवीनां काव्यपाठः सञ्जातः। अत्र बोडो-आंग्ल-मैथिली-मणिपुरी-सिन्धी-संस्कृत-संथाली-तमिल भाषाणां युवकवयः काव्यपाठम् अकुर्वन्। अस्मिन् कार्यक्रमे संस्कृतकाव्यपाठाय निमन्त्रितः संस्कृतस्य युवकविः डा. संजयकुमारचौबे स्वकीयकाव्यपाठम् अकरोत्।

# इतिहासः संस्कृतिः च शिक्षायाः मूलाधारः-बैंकैयानायडु

नैतिक एवं मूल्याधारित शिक्षा वर्तमान समस्य आवश्यकताऽस्ति। अद्यतनीय युवकान् स्वेतिहास एवं संस्कृतेः ज्ञानं भवितव्यम्। एतत्सर्वं भारतस्य उपराष्ट्रपति श्री एम.वैंकैयानायडु दिल्लीविश्वविद्यालयस्य पीजीडीएवी महाविद्यालयस्य हीरक जयन्ती समारोहे व्यक्तवान। शिक्षा




केवलं ज्ञानदात्री नास्ति अपितु कर्तव्यपालनार्थमपि सम्बोधयति शिक्षा युवकेषु नैतिकविचारः, अध्यात्म, समाजसेवायाः भावना एवं मातृभक्ति विषयेऽपि कथयति। शिक्षा सर्वेभवन्तु सुखिनः एवं वसुधैवकुटुम्बकस्य इति भावना अपि जागर्ति। शिक्षायाः उद्देशस्यपूर्त्यर्थं एतादृशः महाविद्यालयः अग्रसरोऽस्ति अद्यतन समये दयानन्दसरस्वती महाभागानां पथे अग्रसरित एतादृश महाविद्यालयस्य आवश्यकताऽस्ति। महर्षि आधुनीकि वैज्ञानिकी शिक्षा एवं वैदिक दर्शनस्य समन्वयः कृतवान। ते उक्तवन्तः शिक्षाया अथोऽस्ति सकारात्मक चिन्तनम्, राष्ट्रं प्रति कर्त्तव्यनिष्ठ एवं संकृतेः संरक्षक। जीवने सकारात्मक चिन्तनं भवितव्यम्। ते उक्तवन्तः कुत्रापि निवसन्तु परञ्च स्व मातृभाषां न विस्मरन्तु। विश्वविद्यालयस्य उपकुलपति प्रो. योगेशत्यागी उक्तवान यत् अयं महाविद्यालय महर्षि सदृश महात्मानां आदर्शस्य संरक्षणार्थमस्ति। शिक्षण एकः महत्वपूर्ण कार्यमस्ति। अस्य गरिमाः संरक्षितव्यम्।

प्राचार्य डॉ. रवीन्द्रकुमारगुप्ता महाविद्यालयस्य उपलब्धिनां विवरणं कृतवान। ते उक्तवन्तः अस्य स्थापना 1958 तमे वर्षे अभवत्। अत्र छात्राणां कृते विविधाः योजनायाः आरम्भः कृतवन्तः महाविद्यालय प्रबन्धनः। उपराष्ट्रपति महाविद्यालयस्य वार्षिकपत्रिका विलाम्बरायाः विशिष्ट अंक यो महर्षि दयानन्दसरस्वती महोदयोपरि आधारितोऽस्ति एवं शुभाशीष नामक पत्रिकायाः विमोचनं कृतवन्तः। अस्मिन्वसरे अत्र प्रबन्धनसमितेः अध्यक्ष श्री.ओ.एन.चतुर्वेदी, प्रशासकीय समिति अध्यक्ष डॉ. सतीशशर्मा एवं महाविद्यालयस्य पूर्व प्राध्यापकाः अपि उपस्थिताः आसन्। संचालिका डॉ. रुक्मिणी मंचसंचालन कृतवती।

**। हरि ॐ तत्सत्! हर हर महादेव!**

कुम्भक्षेत्रात्- श्रीअरविन्द पाण्डेयः
तीर्थराजप्रयागो विजयतेतराम्।
भवतु सदा सुमङ्गलम्।
सर्वेभ्यो भक्तेभ्यो नमो नमः।।

भगवत्कृपया गतदिवसे संगमतटे दिव्यकुम्भपावनक्षेत्रे 'श्री सीताराम-नाम अखण्ड-संकीर्तन' इति नामधर्मशिविरे साधुहृदयाः संस्कृतकविकुलभूषणाः डॉ० राजेन्द्र त्रिपाठि 'रसराज' महाभागाः डॉ० अरविन्द तिवारि महोदयाश्च समागतवन्तः।

ते परमविरक्तानां भगवद्भक्तानां वैष्णवसाधुकुलभूषणानां पूज्यपादानां श्री श्री 1008 स्वामिनो जयरामदास-महापुरुषाणां सान्निध्यं लब्ध्वा शुभाशीर्वादान् शुभकामनाश्च प्राप्तवन्तः।

विशेषतः डॉ० अरविन्दमहाभागैर्विरचितं दिव्यकुम्भः इति नामकं पुस्तकं पठित्वा श्रुत्वा च धर्मशिविरे मुदिताः सर्वे सत्पुरुषाः 'जय जय' इति घोषं कृत्वा डॉ० अरविन्द तिवारि-महाभागान्प्रति शुभाशीर्वादान् कृतज्ञताञ्च ज्ञापितवन्तः।

।। सत्यसनातनधर्मो विजयतेतराम्।।



# सम्पादकीयम्

अयि सुरभारतीप्रणयिनः!

कुम्भपर्वणि भवतां भवतीनां हार्दिकं स्वागतं प्रयागराजेऽधुना। सत्यमेवोक्तं केनचित् भारतं पर्वणाम् उत्सवानां मनोहारी देशो वर्तते। प्रतिमासं प्रतिपक्षं प्रतिदिनं वा अत्र विविधपर्वणां समायोजनं सुखकरमाभाति। को न जानाति कुम्भपर्व। अस्मिन् संवत्सरे तीर्थराजे प्रयागे अर्द्धकुम्भ आयोजितो वर्तते। दर्शनीयं पर्व सम्पूर्णमपि विश्वमेकनीडं करोति। दूरदूरात् भारतस्य कोणात् श्रद्धालव आगच्छन्तो वर्तन्ते। दिव्यकुम्भो भव्यकुम्भो वा जनानां मनो हरत इवेति नात्र संशयः। समुचिता च व्यवस्था सर्वकारस्य सर्वानप्याकर्षति। मन्ये कुम्भस्नानाय गतः सर्वोऽपि जनः मुक्तस्वरेण वर्तमानसर्वकारं प्रशंसत्येव। विशालो जनसम्मर्दः गमनागमनव्यवस्था सुरक्षा इति सर्वमपि विशिष्टमस्ति। धन्योऽयं भारतदेशो यत्र कुम्भपर्व आयोज्यते। श्रुतमस्माभिर्यत् वैदेशिकाः साधवोऽपि कुम्भाभिषेकार्थमागतास्सन्ति।

दर्शनीया श्रद्धा विचरति कुम्भक्षेत्रे। वृद्धा युवानो बालकाः सोत्साहमागताः संगमजले स्नात्वा आनन्दं लभमानाः सन्ति। अहं मन्ये यो जनः कुम्भस्नानं करोति तस्य नूनमेव कामनां प्रभुः पूरयिष्यति स च जनः क्षीणकल्मषो भविष्यतीति।

अन्ते सर्वेभ्यः कुम्भस्नानशुभकामनां ददाना निजां वाणीं समाप्नोमि।

## वेदामृतम्

**( ऋग्वेदभाष्यम् )**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

**द्रविणसो ग्रावहस्तासो अध्वरे।**
**यज्ञेषु देवमीळते ॥७॥**

अर्थ-इस मन्त्र में श्लेषालङ्कार है। सब मनुष्यों को सब कर्म, उपासना तथा ज्ञानकाण्ड यज्ञों में परमेश्वर ही की पूजा तथा भौतिक अग्नि, होम वा शिल्पादि कामों में अच्छी प्रकार संयुक्त करने योग्य है।।७।।

उक्त अग्नि ही सब पदार्थों का देने वा उनका दिलानेवाला है, इस विषय का उपदेश अगले मन्त्र में किया है

**द्रविणोदा ददातु नो वसूनि यानि शृण्विरे।**
**देवेषु ता वनामहे।।८।।**

अर्थ-परमेश्वर ने इस संसार में जीवों के लिए जो पदार्थ उत्पन्न किये हैं, उपकार में संयुक्त किये हैं, उन पदार्थों से जितने प्रत्यक्ष वा अप्रत्यक्ष वस्तु से सुख उत्पन्न होते हैं, वे विद्वानों ही के सङ्ग से सुख देनेवाले होते हैं ।।८।।

यज्ञ करनेवाले मनुष्यों को ऋतुओं में करने योग्य कार्यों का उपदेश अगले मन्त्र में किया है।

**द्रविणोदाः पिपीषति जुहोत प्रचं तिष्ठत।**
**नेष्टादृतुभिरिष्यते।।९।।**

अर्थ-इस मन्त्र में बचाकलुप्तोपमालङ्कार है। मनुष्यों को अच्छे ही काम सीखने चाहिए, दुष्ट नहीं और सब ऋतुओं में सब सुखों के लिए यथायोग्य कर्म करना चाहिए तथा जिस ऋतु में जो देश, स्थिति करने वा जानाआना तथा उस देश के अनुसार खाना-पीना वस्त्रधारणादि व्यवहार करके सब व्यवहार निरन्तर सेवन करना चाहिए।।९।।

फिर ऋतु-ऋतु में ईश्वर का ध्यान करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है-

**यत्त्वा तुरीयमृतुभिर्द्रविणोदो यजामहे।**
**अर्ध स्मा नो ददिर्भव।।१०।।**

अर्थ-परमेश्वर तीन प्रकार के, अर्थात् स्थूल, सूक्ष्म और कारणरूप जगत् से अलग होने के कारण चौथा है, जोकि सब मनुष्यों को सर्वव्यापी, सबका अन्तर्यामी और आधार, नित्य पूजन करने योग्य है, उसको छोड़कर ईश्वर बुद्धि करके किसी दूसरे पदार्थ की उपासना न करनी चाहिए, क्योंकि इससे भिन्न कोई कर्म के अनुसार जीवों को फल देने वाला नहीं है ।।१०।।

फिर ऋतुओं के साथ में सूर्य और चन्द्रमा के गुणों का उपदेश अगले मन्त्र में किया है।

# प्रक्रियाकौमुद्याः प्रकाशटीकायाः उपयोगित्वम्

**डॉ. विभूतिनाथझा**
सहायकोऽध्यापकः,
श्रीरामसुन्दरसंस्कृतविद्यापप्रतिष्ठानम्,
रमौली, विल्ववनम्, दरभंगा, बिहारः

विदन्त्येव भवन्तो यद्वेदाः सन्ति भारतीयसंस्कृतेराधारस्तम्भाः। षडङ्गान्यपि सुप्रसिद्धान्येव तेषु 'मुखं व्याकरणं स्मृतम्' इति पाणिनिशिक्षोक्तवचनानुसारं वेदानाम्मुखस्थानीयं व्याकरणशास्त्रं महत्त्वपूर्णं स्थानं भजते। व्याकरणे मुनित्रयाणां स्तुतिः पदे-पदे समुपलभ्यते, तेषु त्रिष्वपि मुनीषु पाणिनेरादिमं स्थानं वर्तते। पाणिनियप्रणीताया अष्टाध्याय्याः विषयाणां प्रकाशनाय यथा भट्टोजिदीक्षितेन सिद्धान्तकौमुदीति ग्रन्थं विरचितं तथैव श्रीमद्रामचन्द्राचार्येण प्रक्रियाकौमुदीति ग्रन्थं विरचितम्।

सिद्धान्तकौमुद्याः शैलीतोऽपि सरलया शैल्या प्रकिक्रयाकौमुदीग्रन्थस्य प्रणयनमेभिर्विहितमिति सर्वैरनुज्ञायतमेव।

प्रक्रियाकौमुद्याः अनेकविधासु टीकासु द्वे टीके प्रसिद्धतमे विद्येते। तस्याः प्रचाराय प्रसादः, प्रतिज्ठायै च प्रकाष्ठः बभूव। अयं हि प्रकाशोऽतीव प्राञ्जलः परमविद्वत्तापूर्णश्च टीकाग्रन्थोऽस्ति। प्रकाशकारेण शेषकृष्णपण्डितेन विषमग्रन्थ बोधाय प्रकाश टीकायाः मङ्गलाचरणे एकोनचत्वारिंशत्तमे श्लोके एवं प्रतिज्ञातम्-

**कामं किन्तु निरस्तविस्तरमिह प्रस्तुत्य मूलं शिशुः।**
**त्रासान्यासिमया मितं हितमिहानुक्तं विविक्तं च यत्।।**[1]

तदनुसारेणैव सर्वत्र शिशुत्रासाद् विस्तरं हित्वा मितं हितं चोक्तं प्रकाशे, न तु तेन पाण्डित्य-प्रदर्शनं विहितम्। दिङ्मात्रोदाहरणम्ः- बहुषु वहुवचनम्[2] इति सूत्र व्याख्यायां प्रकाशे "वयन्तु बालव्युत्पादनाय तत्र तत्रोणादि प्रक्रियां दर्शयिष्यामः" इति। "साम आकम्[3]" इत्यत्र प्रकशे प्रक्रिया व्युत्पत्यर्थं तु दिङ्मात्रं दर्शितम्" इत्युक्तम्। "अर्थवद्धातुरप्रत्ययः प्रातिपदिकम्[4]" इत्यत्र प्रकाशे बहुवक्तव्यश्चायमर्थोऽपि बालत्रासातूपरम्यते" इति। तथापि-

**भाष्यादिषु न्यायसिद्धमर्थमाश्रित्य सिद्धवत्।**
**व्याख्यास्ये कौमुदीं न्यायान्नु संबद्धमाकसत्।।**[5]
**उद्धृत्य सारमिदमीयमिहोपबद्धं।**
**सिद्धान्तशुद्धिविबुभुत्सुजानुरोधात् ।।**[6]

तदीयेयं प्रकाश व्याख्या महाभाष्यस्य प्रमाणं विना न प्रवर्तते इत्युद्धृत मङ्गलाचरणश्लोकयोस्तेन प्रतिज्ञातम्। इतः पूर्वं त्रयश्चत्वारिंशत्तमे मंगलाचरणश्लोके "फणि प्रयुक्ता भणितीर्विचिन्त्य चिरं मदुक्तिः परिभावनीया' इत्युक्तम्। स्वप्रतिज्ञानुसारं शेषकृष्णपण्डितेन पदे-पदे महाभाष्य प्रमाणमुद्धरता तदाशयञ्च प्रकटयता परमतं खण्डितं स्वमतं स्थापितञ्चेति दिङ्मात्रोदाहरणं प्रस्तुत-सन्दर्भे प्रस्तूयते।

(क) न बहुव्रीहौ[7] अत्र प्रकाशे शेषकृष्णपण्डितेन भगवान् गोनर्दीयस्त्वाह-अकच् स्वरौ तु कर्त्तव्यौ प्रत्यङ्गं मुक्तसंशयम्, त्वकत्पितृको मकत्पितृक इत्येव भवितव्यम् इति सूत्र व्याख्यानमेतत् यथोत्तरं मुनीनां प्रामाण्याद् भाष्यकारोक्तैरेव व्यवस्था ज्यायसीति" इत्युक्तम्। अनेन महाभाष्यकारस्य प्राधान्यं तेन स्वीकृतम्।

(ख) षिद्गौरादिभ्यश्च[8] अत्र प्रकाशे शेषकृष्णपण्डितेन भाष्यकाराशयः प्रकटितः, तथाहि "रजकीति 'पुंयोगादाख्यायाम्[9]' इति ङीषि। अपुंयोगे तु ङीषा न भाव्यमिति भाष्यकाराभिप्राय इति। एवन्तु प्रत्ययस्थात्[10] इतीत्वे रजकेतिभाव्यम्

(ग) इकोऽसवर्णेशाकल्यस्य ह्रस्वश्च अत्र प्रकाशे शेषकृष्णेन चकारस्य महाभाष्यकृत प्रत्याख्यानस्य प्रकारो दर्शितः। तथा च भाष्ये ह्रस्वविधिसामर्थ्यादेव प्रकृतिभावे सिद्धे तदनुकर्षणार्थश्चकारः प्रत्याख्यातः। ह्रस्वानामप्येतत्प्रयोजनतयैव ह्रस्वो भविष्यतीति। वैकल्पिके तु ह्रस्वे ह्रस्वाभावपक्षे प्रकृतिभावार्थश्चकारः कथं प्रत्याख्यायेत। एवं 'चक्रि अत्र' चक्र्यत्र' इति द्वे एव रूपे। चक्री अत्रेत्येतत्तु स्थितिः प्रदर्शनपरतया योज्यम्। अत्र "एङः पदान्तादति" इत्यतः पदान्तादित्यधि कारात् गौर्य्यावित्यादौ न भवति" इति। अनेन महाभाष्य सिद्धान्तानुसारं प्रक्रियाकौमुदीकार प्रदर्शितानि त्रीण्युदाहरणानि सम्यक्तया संयोज्य तद् दोषः परिहृतः। अत एव दीक्षितेनापि वैयाकरण सिद्धान्तकौमुद्यां प्रस्तुते सूत्रे एतन्मतं गृहीतम्। तथा हि "अत्र ह्रस्व विधिसामर्थ्यादेव प्रकृतिभावे सिद्धे तदनुकर्षणार्थश्चकारो न कर्तव्यः इति भाष्ये स्थितम्"।

एवमेव शेषकृष्ण पण्डितेन प्रकाशे पदे-पदे कैयट प्रामाण्यैः आकर प्रामाण्यैष्ठच परमतानि परीक्षितानी' ति कैयटोक्त सदाग्रहः तेन समुपस्थापितः। तेन प्राक्तनाः सर्वे व्याकरणग्रन्थाः अनेनैव निकज़ेण परीक्षिताः। प्रस्तुते प्रसङ्गे दिङ्मात्रो दाहरणानि प्रदर्ष्यन्ते।

**(क) कैयटः**

(1) यण् विधौ "स्थानेऽन्तरतमः[11] यथासंख्यमनुदेशः समानाम्[12] इत्युभयथाऽपि व्यवस्था भवितुमर्हति। अतएव भाष्ये "स्थानेऽन्तरतमः[13] इति सूत्रे किमुदाहरणम् दध्यत्र,

मधवत्रेत्युक्तम्। पश्चाच्च संख्यातानुद्देशेनाप्येतत् सिद्धमित्युक्त्वा तयोरविशेषः सूचितः। अतएव प्रकाशे "तस्थस्थमिपां तान्तन्तामः[14] इत्यादावान्तर्यासम्भवातदर्थमिद मारब्धम्" "एवञ्चेहाप्यप्रतिहत विषयत्वात् सौकर्यवशाच्चाचार्यैरुपन्यस्तम्" प्रकाशे षट्षष्ठिरिकः यण् सप्तेति वैषम्यात् यथासंख्यं न लभ्यमित्याशङ्क्य कैयट-वचनेन श्रीशेषकृष्णेन प्रकाशे समाहितम्। तथा हि-"शब्दतः साम्यस्य सत्वाभ्युपगमान्न दोषः। शब्दसाम्यमेकयोगश्चेत्येष पक्ष आश्रयितव्य इति कैयटोक्तेः अतएव "स्यतासी लृलुटोः[15] इत्यत्रापिष्टासिद्धिः" इति।

(2) ह्रस्वो नपुंसके प्रातिपदिकस्य[16]

अत्र प्रकाशे माधवमतं कैयटानुरोधेन परीक्षितम्। तथाहि प्रकाशे "यो माधवाचार्यः सोमपाशब्दस्य क्लीबे ह्रस्वत्वे ङेर्यादेशे कृते 'सुपिच[17]' इति दीर्धे भसंज्ञायाम्

'आतोधातोः[18] इत्यालोपे सोमपे इति भवतीत्युक्तम्। तदसत्। सन्निपातपरिभाषया लोपस्याप्रसक्तेः आकारं ह्याश्रित्य यः शब्दः कृत इति विकृतस्यापि तस्य लोपेऽनिमित्तम् दीर्घत्वन्तु कज़्टायेति निपातनाद् भवतीति कैयटस्य विरोधात्"।

(3) अकथितञ्च[19]

अत्रापि प्रकाशे माधवाचार्य-मतं कैयटानुरोधेन श्रीष्ठेषकृष्णेन परीक्षितम्। तथा हि

माधवाचार्याः-

**जयतेः कर्षतेः मन्थेर्मुषेर्दण्डयतेः पचेः।**
**तारेः ग्राहेस्तथा मोचेस्त्वाजेः दीपेश्च संग्रहः।।**[20]

त्याजेरपि पाठं कैयटो न मन्यते यतोऽकथित्सूत्रे गवां पयस्त्याजयतीत्युदाजहार इति।

**(ख) आकरः**

(1) "किञ्च भद्रह्रदादौ द्वित्वप्रसङ्गाज्जातिपक्ष एवाश्रीयते न व्यक्तिपक्ष इत्याकरे स्थितम्" इति 'हलो यमां यमि लोपः[21] इत्यत्र प्रकाष्ठे। अत्र प्राचीनमत खण्डने शेज़कृष्णेन आकरप्रमाणमुद्धृतम्।

(2) "अत्राकरे शास्त्रासिद्धमेव स्थितम्" इति 'पूर्वत्रासिद्धम्[22]' इत्यस्य प्रकाशे। अनेन शेषकृष्णेन प्रक्रियाकौमुदीकारस्य मतं परीक्षितम्।

(3) "सवर्णदीर्घे प्राप्तेऽनेन ह्रस्व एव ऋकार एकादेशो जात इति प्राचोक्तम् तदाकरविरुद्धम्" इति "ऋति सवर्णे ऋवा[23]" इत्यत्र प्रकाशे शेषकृषणेन प्राचोक्तं समीक्षतम्।

विवादितेषु स्थलेषु प्रकाशे श्रीशेषकृष्ण-पण्डितेन 'यथोत्तरं मुनीनां प्रामाण्यम्' इतिरीत्या ग्रन्थाष्ठायः साधितः-

(1) तथा हि-यथोत्तरं मुनीनां प्रामण्यमिति तन्मतावलम्बनेनाचार्येण 'न समास' इत्येव पठितम्" न समासे[24]' इत्यत्र वार्त्तिकव्याख्याने प्रकाष्ठे।

(2) "भगवान् गोनर्दीयस्त्वाह-अकच् स्वरौ तु कर्त्तव्यौ प्रत्यङ्गं मुक्तसंशयम् 'त्वकत्पितृको' मकत्पितृक इत्येव भवितव्यम्" इति। सूत्र प्रत्याख्यानमेतत् "यथोत्तरं मुनीनां प्रामाण्याद् भाष्यकारोक्तेरेव व्यवस्था ज्यायसीति।" न बहुव्रीहौ[25] इत्यत्र प्रकाष्ठे।

(3) "सुध्यादयः पुंवत्" इति "वामि[26]" सूत्रे प्रक्रिया कौमुद्यां श्रीमद्रामचन्द्राचार्येणोक्तम्। अत्र प्रकाशे 'एतत् कैयटमतेन द्रष्टव्यम्। भाज़्यकारहरदत्तयोस्तु मते आध्यै ब्राह्मण्यै इति वन्नदीत्वाभ्युपगमात् स्त्रीलिङ्गे नदीकार्यं भवत्येव" इत्युक्तं श्रीशेषकृष्णेन। इतः पूर्वं "यूस्त्र्याख्यौ नदी[27]" इत्यत्र प्रकाशे "आध्यै, ब्राह्मण्यै इति भाष्योदाहरणं चिन्त्यमित्याह कैयटः। एतदनुसारेणैवाचार्यैरप्युच्यते "सुध्यादयः पुवंत्" इत्युक्तम्।

अनेन यथोत्तरं मुनीनां प्रामाण्यम् इति रीत्या प्रक्रियाकौमुदीकारस्य मतं सुसाधितं प्रकाशे श्रीशेषकृष्णेन। पाणिनीयेषु व्याकरणेषु महाभाष्यकारात् प्रभृतिकेचन प्रमाणतया समुल्लिखिताः प्रकाशे, केचिच्च पर्यालोचिताः। इति शम्।

**(Footnotes)**

1 प्रक्रियाप्रकाशस्यमङ्गलाचरणे ( 39 तमे श्लोक)
2 पा.सू. 1/4/2 3 पा.सू. 7/1/33 4 पा.सू. 1/2/45
5 प्रक्रियाप्रकाशस्यमङ्गलाचरणे 44 तमे श्लोक
6 प्रक्रियाप्रकाशस्यमङ्गलाचरणे 45 तमे श्लोक
7 पा.सू.- 1/1/22 8 पा.सू.-4/1/44 9 पा.सू.-4/7/48 10 पा.सू. -6/1/109 11 पा.सू.-1/1/50 12 पा.सू.-1/3/10
13 पा.सू.-1/1/50 14 पा.सू.-3/4/110
15 पा.सू.-3/1/33 16 पा.सू.-1/2/47
17 पा.सू.-6/4/102 18 पा.सू.-6/4/102
19 पा.सू.-1/4/51 20 पा.सू.-प्रक्रिया प्रकाशे (कारक प्रकरणे)
21 पा.सू.-8/4/64 22 पा.सू.-8/2/1
23 पा.सू.-6/1/101 24 पा.सू.-6/1/127
25 पा.सू.-1/1/22 26 पा.सू.-1/4/5 27 पा.सू.-1/4/3

# उत्तरप्रदेशसंस्कृतसंस्थानद्वारा त्रिदिवसीय-संस्कृतकुम्भकार्यक्रमस्यायोजनम्

प्रयागराजतः:- उत्तरप्रदेशसंस्कृतसंस्थानद्वारा 29-31जनवरीमासस्य त्रिदिवसीयस्य समायोजितसंस्कृतकुम्भकार्यक्रमस्य प्रथमदिवसे विख्यातनामानः अंगुलिगण्यविद्वत्सु समर्चनीयाः प्रो0 कमलेशत्रिपाठिमहोदयाः संस्कृतसमुत्थानाय मनोहारिवक्तव्यं प्रस्तुतवन्तः। तैर्महती चिन्ता प्रकटिता संस्कृतं प्रति। विबुधवरेण्यैस्तैरुक्तं यत् संस्कृतस्य रक्षा विशेषत उत्तरभारते उत्तरप्रदेश-बिहारप्रदेशवास्तव्यैः कृता। अन्येषु राज्येष्वि संस्कृतस्य प्रचारो विधीयत एव किन्तु अनर्योयोगदानमविस्मरणीयमस्ति। अवसरेऽस्मिन् तैः विदुषां नगरी



मिथिला सादरं स्मृता। संस्कृतस्य संरक्षणाय सर्वविधप्रचाराय च एतैः सुखदं भाषणमदीयत। स्वागतं संस्थानस्य अध्यक्षवर्याः डॉ वाचस्पतिमिश्रमहोदयाः, संचालनं डॉ आनन्दश्रीवास्तवमहोदयाः अकुर्वन्। धन्यवादज्ञापनं प्रो0 हरिदत्तशर्ममहोदया अकुर्वन्।

सायंकाले संस्कृतकविसमवायः समनुष्ठितोऽभूत्। यत्र अध्यक्षा अभूवन् प्रो0 ओमप्रकाशपाण्डेयमहोदयाः। कविसमवायस्य आरम्भः प्रो0 जनार्दनप्रसादमणिमहोयानां सरस्वतीवन्दनया तथा काव्यपाठेनाभवत्। काशीतः समायाता वन्दनीया डॉ कमलापाण्डेया सुमधुरं काव्यपाठं विधाय सर्वानप्यमोहयत्। बागपतः समायातः डॉ अरविन्दकुमारतिवारी दिव्यकुम्भो जयेद् भव्यकुम्भो लसेत् इति काव्यपाठेन श्रोतॄणां मनांसि अहरत्। रायबरेलीवास्तव्यो हास्यकविः डॉ प्रशस्यमित्रशास्त्री स्वमनोहारिकाव्येन हृदयमहरदिति। हापुडतः समायातो वीररसः कविः डॉ वागीशदिनकरो वीररसेन सहृदयानां हृदयानि अचोरयत्। प्रो0 हदिदत्तशर्म्ममहोदयानां काव्यं सुखदं श्रवणीयमभूत्। प्रयागराजस्थो ललितकविः रसराजोपनामा डॉ राजेन्द्रत्रिपाठिमहोदयः प्रासंगिककाव्यपाठेन कविसमवायमजयत्। अन्ते प्रो ओमप्रकाशपाण्डेयमहोदयानां मनोहरं काव्यं श्रुत्वा श्रोतारो मुग्धा जाताः। मंचे कवयित्री डॉ नवलता विराजमाना आगतानां सुकवीनां काव्यपाठं श्रावं श्रावं मुदिताभवत्।

अतःपरं श्रावणोऽभूद् बैशाखः इत्याख्यस्य नाटकस्य दर्शनीयं मंचनं दृष्ट्वा प्रेक्षका नन्दिता अभूवन्।

प्रयागराजतः:- उत्तरप्रदेशसंस्कृतसंस्थानेन समायोजितेऽस्मिन् संस्कृतकुम्भकायक्रमे द्वितीयदिवसे संस्कृतस्य दशा दिशा चेति विषये संगोष्ठी समायोजिताभूत्। संस्थानस्य अध्यक्षवर्याः डॉ वाचस्पतिमिश्रमहोदयाः स्वागतप्रस्तावभाषणे न्यगदन् यत् अभी नहीं तो कभी नहीं अर्थात् नाधुना यदि संस्कृतोन्नतिस्तदा न कदापि । अर्थात् स्वर्णिमकाले यदि संस्कृतस्य संवर्धनं न भवति चेत् कदापि



भवितुं नार्हति। एतैरुक्तं यद् भवन्तो विद्वांसः संगोष्ठ्याम् आमन्त्रिता वदन्तु यत् केनोपायेन संस्कृतस्य उन्नतिर्भवेत्?

संगोष्ठ्या अध्यक्षाः श्रीमन्तः प्रो0 रहसबिहारिद्विवेदिमहोदया अवोचन् यत् संस्कृतस्य विकासाय शिक्षकैः प्राध्यापकैरुपाध्यायैराचार्यैश्च सदैव प्रयासो विधेयः। एतैरुक्तं यत् संस्कृताध्यापका व्यथां न प्रकटयेयुः। ते शिक्षणं कुर्युः। न कदापि क्वचिदपि अपात्रनियुक्तिः करणीया। कर्तव्यभावनया सर्वैरपि संस्कृतशिक्षणं कार्यमिति।

अस्यां संगोष्ठ्यां वाराणसेयः प्रो0 प्रभुनाथद्विवेदिमहोदयो न्यगादीत् यत् संस्कृतजीविनो वयं सर्वे संस्कृतस्य रोटिकां खादामः, किन्तु



तद्दायित्वपूर्तये तत्परा न स्मः। संस्कृतं सर्वं ददाति, वयं तस्मै किं प्रयच्छामः? संस्कृतज्ञाः स्वकुटुम्बेऽपि संस्कृतं प्रति भावनां न प्रकटयन्ति। एतेन महोदयेन प्रोक्तं यत् श्रीलंकादेशे बौद्धधर्मप्रचाराय एकः परिवार एकं जनमर्पयति। अनेन प्रकारेण भारतीया अपि संस्कृतप्रचाराय वर्तेरन्। श्रीद्विवेदिना प्रोक्तं यत् लोकाश्रय-राजाश्रयद्वारा भाषा सुरक्षिता भवति। अतः संस्कृतज्ञैः पत्रिका क्रेतव्याः पठितव्याश्चेति। येन संस्कृतस्य प्रचारो भवेत्।

अवसरेऽस्मिन् गंगानाथझासंस्कृतसंस्थानस्य आचार्याः डॉ ललितत्रिपाठिमहोदयाः सुन्दरं मतमुपस्थापितवन्तः। एतैः सादरं प्रोक्तं यत् वयं स्वार्थवशान्न सत्यं वदामः। संस्कृतस्य दशा कीदृशी वर्तत इति को न जानाति। यः सर्वकारः कुम्भपर्वण आयोजनं कर्तुं शक्नोति स संस्कृताय किं न कर्तुं शक्नाति। संस्कृतज्ञा अग्रे आगच्छेयुः, न केवलं गोष्ठीसमायोजनेन तात्कालिककार्येण संस्कृतस्योदयो भविष्यति। राष्ट्रगौरवाय संस्कृतरक्षा आवश्यकी वर्तते। इयं भाषा मानवताया भाषा वर्तते।

अस्यां संगोष्ठ्यां विराजमानाः काशीहिन्दूविश्वविद्यालयस्य आचार्याः प्रो0 सदाशिवद्विवेदिमहोदयाः संस्कृतसंरक्षणाय सम्यगुक्तवन्तः। तैरुच्यत यत् पारम्परिकाधुनिकसमन्वयः संस्कृतस्य विकासाय समाश्रयणीयः। प्रायशः अशीतिप्रतिशतभारतीयानां हृदये भारतीयता निवसति, संस्कृतिः प्रवहति। आवश्यकता वर्तते समुचिततार्किकसहयोगस्येति।

प्रो0 कौशलकिशोरश्रीवास्तवेन संगोष्ठ्यामस्यां निगदितं यत् योगक्षेमनिर्धारणेनैव संस्कृतं सुरक्षितं भविष्यति। अस्माकं पूर्वजैर्महता कष्टेन संस्कृतं संरक्षितमस्ति। तेऽवदन् यत् आधुनिकताग्रहणे न स्वपुरातनत्यागो विधेयः। किं च पाठ्यक्रमनिर्धारणे समुचितो विद्वानेव ग्राह्यो भवेत्। प्रेमाख्यानेन साकं चिकित्सादिविषयकमपि काव्यं रचनीयमेव कविभिः।

काशीहिन्दूविश्वविद्यालयस्य प्रो0 भगवत्शरणशुक्लमहोदयाः संस्कृतस्य दशादिशाविषये मनोहारिविचारान् प्रस्तुतवन्तः। एभिः प्रोक्तं यत् संस्कृतस्य विविधा धारा भारते राजन्ते। संस्कृतस्य मूलं वेदादिशास्त्राणां संरक्षणमस्ति। सम्प्रति बहवः प्रकल्पाः संस्कृतस्य प्रचाराय संचाल्यन्ते, किं ते सुष्ठु? तैः संस्कृतस्य सम्यक् प्रचाराय पंचदश परामर्शाः प्रदत्ताः। एतैरुक्तं यत् सेमेस्टरप्रणाल्या संस्कृतस्य शिक्षणं दुष्करमस्ति।

कार्यक्रमस्य संचालनं डॉ राजेन्द्रत्रिपाठिरसराजमहोदयाः अकुर्वन्।

अस्मिन्नेव दिने सायंकाले महाकविभासविरचितस्य प्रतिमानाटकस्य सुखदं मंचनं कृतं यद्धि प्रेक्षकाणां हृदयदेशमविशत्। दर्शनीयो जनसर्म्मदः संस्कृतानुरागमदर्शयत्। सर्वैरपि उत्तरप्रदेशसंस्कृतसंस्थानस्य भूरिशः



प्रशंसा कृता। सजीवाभिनयेन अभिनेतृभिः विलोकनीयोऽभिनयो दर्शितः।

तृतीयदिवसे बालकानां संस्कृतकविसमवायो जातः। सायंकाले लोकगीतस्य संस्कृतगीतस्य स्वरः प्रयागराजे श्रुतः। संस्कृतस्य प्रचाराय प्रसाराय च संस्कृतसंस्थानस्य कार्यं विलोक्य दूरादागताः प्रेक्षकाः सविस्मयं वर्धापनानि अददुरिति। प्रयागराजस्य संयोजकाः प्रो हरिदत्तशर्म्म-प्रो आनन्दश्रीवास्तव-प्रो जनार्दनप्रसादमणि-डॉ राजेन्द्रत्रिपाठिरसराजमहोदया अन्ये च तीर्थराजस्य संस्कृतविद्वांसः सुरभारतीसमाराधकाः संस्कृतकुम्भे सादरं स्वसहयोगमकाषुरिति। अस्मिन् कार्यक्रमे संस्कृतसंवादस्य वितरणमपि जातम्।

## सुकवेः डॉ राजेन्द्रत्रिपाठिरसराजस्य कुम्भकथायाः लोकार्पणम्



प्रयागराजात्- सुकविः डॉ राजेन्द्रत्रिपाठी रसराजस्य सद्यःप्रकाशितं पुस्तकं प्रयागराज कुम्भकथा लोकाय अर्पितं गतमासे। पुस्तकमिदं कुम्भकथाजिज्ञासूनां भारतीयानां वैदेशिकानां च कृते अतीवोपयोगि वर्तते। धीमता विदुषा प्रो अभिराजराजेन्द्रमिश्राणां शिष्येण विरचितमिदं पुस्तकं सत्साहित्य प्रकाशन दिल्ली द्वारा प्रकाशिता वर्तते। अस्मिन् एकोनविंशतिर्लेखा वैदुष्यपूर्णा विलसन्ति। एतेषु सर्वेष्वपि लेखेषु प्रयागराजस्य कुम्भस्य च विषये प्रमाणपुरस्सरं डॉ रसराजेन विचारः प्रदत्तोऽस्ति। यथा प्रयागराज अतीत और वर्तमान एक परिचय। पुराणों में प्रयाग कुम्भमाहत्म्य प्रयाग में कुम्भोत्सव और माघ का माहात्म्य आदि विषया दर्शनीयाः सन्ति। अस्य पुस्तकस्य विमोचने प्रयागराजस्य महान्तो विद्वांसो मुक्तकण्ठेन डॉ रसराजस्य प्रशंसा कृता। सत्यमेव यथावसरं प्रकाशितेयं कृतिः सर्वेषामपि मनो मोहयतीवेति।




प्रयागतः -संस्कृतकुम्भकार्यक्रमे डॉ अरविन्दकुमारतिवारिविरचितस्य दिव्यकुम्भस्य आह्निककाव्यस्य लोकार्पणम् उत्तरप्रदेशसंस्कृतसंस्थानस्य अध्यक्षमहोदयानां करकमलैरभवत्। संस्कृतस्य प्रचाराय डॉ राजेन्द्रत्रिपाठी रसराजः डॉ अरविन्दकुमारतिवारी कुम्भपर्वणि समागतानां संस्कृतविदुषां शिविरे अगच्छताम्। आभ्यां महामण्डलेश्वराणां श्रीमतामवधेशानन्दमहोदयानां दर्शनं कृतं किं च काव्यामृतवर्षिणी पत्रिका तेषां करकमलेषु समर्पिता। अवसरेऽस्मिन् डॉ राजेन्द्रत्रिपाठिविरचितप्रयागराजकुम्भकथा पुस्तकं तथा डॉ अरविन्दकुमारतिवारिविरचितदिव्यकुम्भनामकं पुस्तकमाचार्यवरेभ्य उपायनीकृते। डॉ केशवानन्दः श्रुतो विद्वान् संस्कृतवाचा मनोऽमोहयतत्।

कुम्भमेलापके परिभ्रमद्भिः डॉ रसराजादिभिः अनेके मान्याः दिव्यसाधवः कोविदाः प्रणताः। तेभ्यः काव्यामृतवर्षिणी पत्रिका दिव्यकुम्भः पुस्तकं च सश्रद्धं प्रदत्ते।

**पाठकानां कृते सूचनाः-**

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- ( संस्थादीनां कृते ) द्विवार्षिकशुल्क रु. २४०/- ( व्यक्तीनां कृते ) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां ( A/C ) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-**

**Sanskrit samvad,**

**Current A/C No. 224902000000142,**

**Indian Overseas Bank, Yamuna Vihar, Delhi-110053**

**IFC Code- IOBA0002249**





अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,

परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारीः

सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।

दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2018-20 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।